**19E**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

## संस्कृत पारंगत (एम्.ए.) बहिःस्थ

## परीक्षा: जानेवारी – २०२३

## सत्र १ ले

**विषय: सामान्य व्याकरण –१** (19E3104)

| दिनांक: १४/०१/२०२३ | गुण : ८० | वेळ : दु. २.०० ते ५.०० |
|---|---|---|

**सूचना:** १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

**प्र.१.** **एकं विषयमधिकृत्य निबन्धं लिखत।** **(१५)**

१) रम्येयं दीपावली।

२) भ्रमणभाषस्य महत्त्वम्।

३) कल्पलतेव विद्या।

**प्र.२.** **अ) माध्यमभाषया एकमनुवादत।** **(१०)**

१) कश्चिच्छृगालः क्षुत्क्षामकण्ठ इतस्ततः परिभ्रमन्वने सैन्यद्वयसङ्ग्रामभूमिमपश्यत्। तस्यां च दुन्दुभेः पतितस्य वायुवशाद्वल्लीशाखाग्रैर्हन्यमानस्य शब्दमशृणोत्। अथ क्षुभितहृदयश्चिन्तयामास, अहो विनष्टोऽस्मि। तद्यावन्नास्य प्रोच्चारितशब्दस्य दृष्टिगोचरं गच्छामि तावद् व्रजामि। अथवा नैतद्युज्यते सहसैव पितृपैतामहं वनं त्यक्तुम्। तत्तावज्जानामि कस्यायं शब्दः।

२) महाराजो दशरथः सत्यस्य पालनायैव प्राणेभ्योऽपि प्रियं पुत्रं रामं वनं प्रेषयामास। युधिष्ठिरः सत्यवचःप्रभावेणैव विजयं लेभे। महाराजो हरिश्चन्द्रः सत्यस्य पालनायैव विविधानि दुःखानि सहते स्म। महात्मा गान्धिः सत्यपालनायैव प्रियान् प्राणानत्यजत्। 'नहि सत्यात्परो धर्मो नानृतात् पातकं महत्' 'सत्यमेव विजयते नानृतम्' इति तन्मतमद्यापि प्रशस्यते जनैः।

**ब) माध्यमभाषया त्रीन् श्लोकान् अनुवदत।** **(१२)**

१) साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम्।।

२) कनकभूषणसङ्ग्रहणोचितो यदि मणिस्त्रपुणि प्रणिधीयते।
न स विरौति न चापि स शोभते भवति योजयितुर्वचनीयता।।

३) लक्ष्मि क्षमस्व वचनीयमिदं यदुक्तमन्धीभवन्ति पुरुषस्त्वदुपासनेन।
नो चेत्कथं कमलपत्रविशालनेत्रो नारायणः स्वपिति पन्नगभोगतल्पे।।

४) सन्तोषामृततृप्तानां यत्सुखं शान्तचेतसाम्।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम्।।

**प्र.३.** **अ) षण्णां रूपाणां परिचयं कारयत।** **(०६)**

| | | | |
|---|---|---|---|
| १.विस्मृत्य | २. अपकारिणाम् | ३. दिक्षु | ४. ज्ञायते |
| ५. ददृशुः | ६. गता | ७. सर्वासु | ८. निःसारयन्ति |

**आ) पञ्चानां समासानां सनामनिर्देशं विग्रहं कुरुत।** **(१०)**

| | | | |
|---|---|---|---|
| १. कृष्णमुखाः | २. ऋतुराजः | ३. प्राप्त्यर्थम् | ४. प्रतिदिनम् |
| ५. सन्तोषमूलम् | ६. रोहणनिपुणाः | ७. पुरुषसिंहम् | ८. शरीरस्थः |

**इ) सूचनानुसारं परिवर्तयत। (केवलं सप्त)** **(०७)**

१) पाश्चात्यदेशीयाः विद्वांसः संस्कृतभाषायाः प्रशंसामकुर्वन्। (एकवचने लिखत।)

२) सम्यगुक्तं केनचित्कविना। (प्रयोगपरिवर्तनं कुरुत।)

३) मनुष्याणां शरीरस्थो महान् रिपुः आलस्यम्। (अधोरेखितशब्दस्य समानार्थकं लिखत।)

४) दैवं निहत्य कुरु पौरुषमात्मशक्त्या। (भवत् सर्वनाम्नः कर्तृपदं योजयत।)

५) शमेन अहिंसया च मुनयः सिद्धिं व्रजन्ति, न तु........। (राजन् शब्दस्य योग्यं रूपं योजयत।)

६) रावणः सीतां प्रत्यर्पयितुम् उद्यतः न बभूव। (लङ्लकारे परिवर्तयत।)

७) स महति विपदि वर्तते। (अशुद्धिसंशोधनं कुरुत।)

८) न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे (सति-सप्तमीरचनां निष्कासयत।)

९) शिशुः दुग्धं पिबति। (परिचारिका इति प्रयोजककर्तृपदं योजयत।)

**प्र.४. अ) एकं संस्कृतेन अनुवदत।** **(१०)**

१) एक मुलगा छोट्या वयात वस्तू चोरून आपल्या आईला देत असे. आई खूष होत असे.अशाप्रकारे मुलगा पक्का चोर बनला. एकदा कोणत्यातरी मोठ्या चोरीसाठी त्याला फाशीची शिक्षा झाली. सगळे लोक त्याला पहायला आले, त्याची आई सुद्धा तिथे होती. त्याने आईचा कान चावला.

२) महाकवि कालिदास सर्व कवींमध्ये श्रेष्ठ होते, यात काही शंका नाही. त्यांच्या काव्यात माधुर्य, प्रसाद इत्यादि सर्व गुण आहेत, जे चांगल्या काव्यात असायला हवेत. म्हणून यांच्या काव्याबद्दल सभ्य समाजात खूप आदर आहे. हा महाकवी कधी झाला, यात सन्दिग्धता आहे. काहीजण म्हणतात की तो आठव्या शतकात झाला, काहीजण म्हणतात की पाचव्या शतकात, काहीजण म्हणतात की हा विक्रमादित्याच्या नऊ रत्नांमधील एक होता.

**आ) माध्यमभाषयानुवदत। (किमप्येकम्)** **(१०)**

१) वसन्तसेवा – रदनिके, स्वागतं ते । कस्य पुनरेष दारकः ननु चन्द्रमा इव मुखमस्य।
रदनाका – जानीहि एतमार्यचारुदत्तस्य पुत्रं रोहसेनम्।
वसन्तसेना – किंनिमित्तं रोदिति एषः?
रदनिका – अस्त्यस्माकं धनिकः प्रतिवेशिकः। तस्य दारकस्य सुवर्णशकटिकयाऽक्रीडत् एषः। अतः तादृशीमेव शकटिकां देहि इति भणति।

२) जीमूतकेतुः – (कर्णौ पिधाय) शान्तं पापम्।
वृद्धा – प्रतिहतं खल्वेतदमङ्गलम्।
मलयवती – वेपते मे हृदयमनेन दुर्निमित्तेन।
जीमूतकेतुः – भद्र किं जीमूतवाहनस्य?
सुनन्द :– जीमूतवाहनस्य वार्तामन्वेष्टुं महाराजविश्वावसुना युष्मदन्तिकं प्रेषितोऽस्मि।
जीमूतकेतुः – किमसन्निहितस्तत्र मे वत्सः?

-------------